No. ४४९६ - घ

Title पद्मपुराणे विष्णुसहस्रनामानि

Author

Extent २६ Age

Subject भक्तिशास्त्रम्

नं० ४४६६-घ

विस्नुनामसहस्रम् पद्मपुराणे

नं० ५५८६-घ

पत्राणि २६

4496

F = 29

॥प.म॥ श्रीसीतारामोजयति ॥ ॥शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ॥ प्रसन्न
॥१॥ वदनं ध्यायेत्सर्वविघ्नोपशांतये ॥१॥ ब्रह्मलोकादिहःप्राप्तं नारदं भगवत्प्रि
यं ॥ दृष्ट्वानत्वा सभायातान्प्रपप्रच्छुर्मुनयोमुदा ॥२ नैमिषेनिमिषक्षेत्रेऋषयः
शौनकादयः ॥ देवर्षिमुपसंगम्यपप्रच्छुरिदमादृताः ॥३॥ ऋषयवाच ॥ ॥राम.॥
ब्रह्मन्केनप्रकारेणसर्वपापक्षयोभवेत् ॥ विनादानेनतपसाविनातीर्थै
र्विनामखैः ॥४॥ विनावेदैर्विनाध्यानैर्विनाचेंद्रियनिग्रहैः ॥ विनाशास्त्रम ॥१॥

मूढैस्थकथंमुक्तिरवाप्यते ॥५॥ दिवाधिदेवेदेवेशस्थितस्तपसिशंकरः ॥ क
यमाराधयेद्देवंजपध्यानपरायणैः ॥६॥ नारदउवाच ॥ इदमेवपुरापृष्टः
पार्वत्यापरमेश्वरः ॥ यदुवाचश्रृणुध्वंहिकथयामिसुविस्तरात् ॥७॥ कै
लासशिखरासीनंदेवदेवजगद्गुरुं ॥ प्रणिपत्यमहादेवंपर्यपृच्छदुमा
प्रियं ॥८॥ पार्वत्युवाच ॥ भगवंस्त्वपरोदेवः सर्वज्ञः सर्वपूजितः ॥ त्वल्लिं
ङ्गमर्च्चिनेदेवैर्ब्रह्मसर्पादिकैरपि ॥९॥ त्वत्तोलभंतेभिमतांसिद्धिंसर्वव

॥प॰म॰॥ रथद ॥ त्वं जन्ममृत्युरहितः स्वयंभूः सर्वशक्तिमान् ॥ १० ॥ सदाध्यायसि
॥२॥ किं स्वामिन् दिग्वासा मदनान्तकः ॥ तपश्चरसि कस्मात्त्वं जटिलो भस्मधूस
रः ॥ ११ ॥ किं वा जपसि देवेश परं कोत्र हृल्ले हि मे ॥ अनुग्राह्या प्रियातेस्मि
2 न्त्वं कथय सुव्रत ॥ १२ ॥ श्रीमहादेव उवाच ॥ नेदं कस्यापि कथितं गोप ॥राम॰॥
नीयमिदं मम ॥ किं तु वक्ष्यामि ते भद्रे त्वं भक्तासि प्रियासि मे ॥ १३ ॥ पुरा सत्य
युगे देवि विशुद्धमतयोखिलाः ॥ यजन्ति विष्णुमेवैकं ज्ञात्वा सर्वेश्वरेश्व ॥२॥

रं ॥२४॥ अयांति परमां सिद्धिमैहिकामुष्मिकीं परां ॥ यान्न प्राप्ता सुरैः सर्वैः र
हूपाक्लेशवर्ज्जिताः ॥२५॥ न तां गतिं प्रंति विना भागवतान्नरान् ॥ मन्मुखा
द्‌पि संकल्पदेवा विष्णुवर्हिर्मुखाः ॥२६॥ वेदैः पुराणैः सिद्धांतैर्भिन्नैर्विभ्रान्त
चेतसः ॥ निश्चयं नाधिगच्छंति किं तत्त्वं किं परं पदं ॥२७॥ तुलापुरुषदानाद्यै
रश्वमेधादिभिर्मखैः ॥ वाराणसीप्रयागादितीर्थस्नानादिभिः क्रियैः ॥२८॥ ग
याश्राद्धादिभिः पित्र्यैर्वेदपाठादिभिर्जपैः ॥ तपोभिरुग्रैर्न्नियमैर्यमैर्भूतद

॥प०स०॥ याद्विभिः ॥१९॥ गुरुशुश्रूषणैः सत्सेर्द्धमैर्वर्णाश्रमोदितैः ॥ ज्ञानध्यानादिभि
॥३॥ ः सम्यक्चरितैर्जन्मजन्मभिः ॥२०॥ नयांतितत्परं श्रेयो विष्णुं सर्वेश्वरेश्वरं ॥
सर्वभावैरनाश्रित्य पुराणं पुरुषोत्तमं ॥२१॥ अनन्यगतमोमर्त्याभोगिनोपि
3 परंतप ॥ ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जिताः ॥२२॥ सर्वधर्मोज्झिता ॥राम०॥
विष्णोर्नाममात्रैकजल्पकाः ॥ सुखेन यां गतिं यांति न तां सर्वेपि धार्मिकाः ॥३॥
॥२३॥ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातु चित् ॥ सर्वे विधिनिषेधाः स्यु

रेतयोरेव किंकराः ॥२४॥ किंतु ब्रह्मादिभिर्देवैः पुरा हृद्ध्यानिरंहसः ॥ निर्भयं वि
ष्णुनाम्नैव यद्येषं पदमागतान् ॥२५॥ अलब्धा चात्मनः पूजां सम्यगाराधितो ह
रिः ॥ मया चास्मादपि श्रेष्ठं वांछतादं कृतात्मना ॥२६॥ ततः साक्षाज्जगन्नाथः
प्रसन्नो भक्तवत्सलः ॥ अंशांशेनात्मनैवैतान्सृजयामास केशवः ॥२७॥ देवान्पि
तॄन् द्विजान् हव्यकव्याद्यैः करुणामयः ॥ ततः प्रभृति पूज्यंते त्रैलोक्ये सचरा
चरे ॥२८॥ मां चोवाच यथा मत्तः पूज्यः श्रेष्ठो भविष्यसि ॥ त्वामाराध्य यथा शंभो

ग्रहीष्यामि वरं तव ॥२९॥ द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥ स्वागमैः
कल्पितैस्त्वं च जनान्मद्विमुखान्कुरु ॥३०॥ मां च गोपय येन स्यात्सृष्टिरे
षोत्तरोत्तरा ॥ ततस्तं प्रणिपत्याहमुवाचैवं परमेश्वरं ॥३१॥ श्रीमहादेव उवा
च ॥ ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथं च न ॥ न पुनस्त्वद्वशांनेकल्पको
टिशतैरपि ॥३२॥ यस्मान्मया पाहृतास्सर्वेपवित्रैः स्यां कथं हरे ॥ ब्रुस्त्वं तानि स
र्वपापानि तन्मे वद सुरेश्वर ॥३३॥ श्रीभगवानुवाच ॥ सदा नाम सहस्रं मे

पावनंमत्पदावहं ॥ तत्पृष्ठानुदिनंशंभोसर्वैश्वर्यंयदीच्छसि ॥ ३४ ॥ श्रीमहादे
व उवाच ॥ तमेवतपसानित्यंभजामिस्तौमिचिंतये ॥ तेनाद्वितीयमहिमाजग
त्पूज्योस्मिपार्वति ॥ ३५ ॥ पार्वत्युवाच ॥ तन्मेकथयदेवेशमयाहमपिशंकर
सर्वैश्वरीनिरूपमातवस्यांसदृशीप्रभो ॥ ३६ ॥ श्रीमहादेवउवाच ॥ साधुसाधु
त्वयापृष्टंविस्तोभगवतःप्रिये ॥ नाम्नांसहस्रंवक्ष्यामिमुख्यंत्रैलोक्यमुक्ति
दं ॥ ३७ ॥ मंत्र ॥ ॐनमोनारायणायपुरुषायमहात्मने ॥ विशुद्धसत्वधिष्ण्याय

॥पु॰स॥ महाहंसायधीमहि ॥३०॥ ॐअस्यश्रीविष्णोर्नामसहस्रस्यश्रीमहादेवऋषीना
॥५॥ रायणऋषिरनुष्टुप्छंदः ॥ विश्वरूपीपरमात्मादेवता अहंबीजं सोहंइतिश
क्तिः ॥ अंक्लींकीलकं ॥ ॐवासुदेवःपरंब्रह्मइत्यंगुष्ठाभ्यांनमः ॥ मूलप्रकृतिरि
5 तितर्ज्जनीभ्यांनमः ॥ महावराहइतिमध्यमाभ्यांनमः ॥ सूर्यवंशध्वजइत्यना ॥राम॰॥
मिकाभ्यांनमः ॥ ब्रह्मादिकाम्यलालित्यजगदाश्चर्य्यशोभवइतिकनिष्ठिका ॥५॥
भ्यांनमः ॥ पार्थार्थखंडिताशेषइतिकरतलकरपृष्ठाभ्यांनमः ॥ ॐवासुदेवः

परंब्रह्मइतिहृदयायनमः॥मूलप्रकृतिरितिशिरसेस्वाहा॥महावराहइतिशि
खायैवषट्॥सूर्यवंशध्वजइतिकवचायहुं॥ब्रह्मादिकाम्यलालित्यइतिनेत्र
त्रयायवौषट्॥पार्थार्थखंडिताशेषइत्यस्त्रायफट्॥दिग्बाधइत्यस्त्रं॥सर्वपा
पक्षयार्थंसर्वाभीष्टसिध्यर्थंमोक्षार्थंश्रीविष्णोर्नामसहस्रजपेविनियोगः॥
अथध्यानं॥विष्णुंभास्वत्किरीटांगदवलयगलाकल्पहारोदरांघ्रिश्रोणीभू
षंसुवक्षोमणिमकरमहाकुंडलमंडितांसं॥हस्तोद्यच्चक्रशंखांबुजगदम

॥प॰म॰॥ मलंपीतकौशेयवासं॥विद्योतद्भासमुद्यद्दिनकरसदृशंपद्मसंस्थंनमामि॥
॥६॥ ३९॥ॐवासुदेवःपरंब्रह्मपरमात्मापरात्परः॥परंधामपरंज्योतिःपरंतत्वंप
रंपदं॥४०॥परःशिवःपरोध्येयःपरंज्ञानंपरागतिः॥परमार्थःपरंश्रेयःप
6 रानंदःपरोदयः॥४१॥परोव्यक्तात्परंव्योमपरर्द्धिःपरमेश्वरः॥निरामयो ॥राम॰॥
निर्विकारोनिर्विकल्पोनिराश्रयः॥४२॥निरंजनोनिरालंबोनिर्लेपोनि
रविग्रहः॥निर्गुणोनिष्कलोनंतोभयोचिंत्योचलोच्युतः॥४३॥अतींद्रियो ॥६॥

मितोपाशो नीशो नीहो व्ययो ह्रूपः॥ सर्व्वज्ञः सर्व्वगः सर्व्वः सर्वदः सर्वभावनः॥
४४॥ सर्वशास्ता सर्वसाक्षी पूज्यः सर्व्वस्य सर्व्वदृक्॥ सर्व्वशक्तिः सर्व्वसारः सर्वा
त्मा सर्वतोमुखः॥ ४५॥ सर्वावासः सर्वरूपः सर्वादिः सर्वदुःखहा॥ सर्वार्थः
सर्वतोभद्रः सर्वकारणकारणं॥ ४६॥ सर्वातिशायकः सर्वाध्यक्षः सर्वेश्वरे
श्वरः॥ षड्विंशको महाविष्णुर्महागुह्यो महाहविः॥ ४७॥ नित्योदितो नित्ययुक्तो
नित्यानंदः सनातनः॥ मायापतिर्योगपतिकैवल्यपतिरात्मभूः॥ ४८॥ ज

॥ प॰ स॰ न्मृत्युजरातीतः कालातीतो भवातिगः ॥ पूर्णः सत्यः शुद्धबुद्धः स्वरूपो नि
॥ ७ ॥ त्यचिन्मयः ॥ ४९ ॥ योगिप्रियो योगमयो भवबंधैकमोचकः ॥ पुराणपुरुषः
प्रत्यक्चैतन्यः पुरुषोत्तमः ॥ ५० ॥ वेदांतवेद्यो दुर्ज्ञेयस्तापत्रयविवर्जितः ॥ ब्रह्म
7 विद्याश्रयोनघः स्वप्रकाशः स्वयंप्रभुः ॥ ५१ ॥ सर्वोपेय उदासीनः प्रणवः ॥ राम॰ ॥
सर्वतः समः ॥ सर्वानवद्यो दुःप्रापस्तुरीयस्तमसः परः ॥ ५२ ॥ कूटस्थः सर्व ॥ ७ ॥
संश्लिष्टो वाङ्मनोगोचरातिगः ॥ संकर्षणः सर्वहरः कालः सर्वभयंकरः

५३ ॥ अनुल्लंघ्यः सर्वगतिर्महारुद्रो दुरासदः ॥ मूलप्रकृतिरानंदः प्रद्युम्नो वि
श्वमोहनः ॥ ५४ ॥ महामायो विश्ववीजं परशक्तिः सुखैकभूः ॥ सर्वकाम्योनंत
लीलः सर्वभूतवशंकरः ॥ ५५ ॥ अनिरुद्धः सर्वजीवो हृषीकेशो मनस्पतिः ॥
निरुपाधिप्रियो हंसोक्षरः सर्वनियोजकः ॥ ५६ ॥ ब्रह्माप्राणेश्वरः सर्वभूतभृ
द्देहनायक ॥ क्षेत्रज्ञः प्रकृतिः स्वामी पुरुषो विश्वसूत्रधृक् ॥ ५७ ॥ अंतर्यामी त्रि
धामांतःसाक्षी त्रिगुण ईश्वरः ॥ योगिगम्यः पद्मनाभः शेषशायी श्रियःपतिः ॥

॥प.स.॥ ॥८॥

8

५८॥श्रीमदोपास्यपादाब्जोनित्यंश्रीश्रीनिकेतनः॥नित्यः वक्षस्थलस्थश्री
ःश्रीनिधिःश्रीधरोहरिः॥५९॥वश्यश्रीर्न्निर्म्मलश्रीदोविशुद्धीराधिमंदिरः
॥कौस्तुभोद्भासितोरस्कोमाधवोजगदार्त्तिहा॥६०॥श्रीवत्सवक्षानिःसी
मकल्याणगुणभाजनं॥पीतांवरोजगन्नाथोजगद्धाताजगत्पिता॥६१॥ज
गद्वंधुर्ज्जगत्स्रष्टाजगद्धाताजगन्निधिः॥जगदेकस्फुरद्वीर्योनाहंवादीजग
न्मयः॥६२॥सर्व्वाश्चर्य्यमयः सर्वसिद्धार्थः सर्ववीरजित्॥सर्वामोघोद्यमोव्र

॥राम.॥ ॥८॥

ह्मरूपः सुश्लिष्टचेतनः ॥६३॥ शंभोः पितामहो ब्रह्म पिता शक्राद्यधीश्वरः ॥ सर्व
देवप्रियः सर्वदेवमूर्त्तिरनुत्तमः ॥६४॥ सर्वदेवैकशरणं सर्वदेवैकदैवतं ॥ यज्ञ
भुग्यज्ञफलदो यज्ञेशो यज्ञभावनः ॥६५॥ यज्ञत्राता यज्ञपुमान्वनमाली द्विज
प्रियः ॥ द्विजैकमानदो विप्रकुलदेवो सुरान्तकः ॥६६॥ सर्वदुष्टान्तकृत्सर्वसज्ज
नानन्यपालकः ॥ सप्तलोकैकजठरः सप्तलोकैकमंडनः ॥६७॥ सृष्टिस्थित्यंत
कृच्चक्री शार्ङ्गधन्वा गदाधरः ॥ शंखभृन्नंदकी चक्रीपाणिर्गरुडवाहनः ॥६८

पत्र १

॥प॰स॰॥ अनिर्देश्यवपुः सर्वः सर्वत्रैलोक्यपावनः॥ अनंतकीर्त्तिर्न्निःसीमपौरुषः स
॥१०॥ र्वमंगलः॥६९॥ सूर्यकोटिप्रतीकाशो यमकोटिदुरासदः॥ ब्रह्मकोटिजगत्स्र
ष्टा वायुकोटिमहाबलः॥७०॥ कोटिंदुजगदानंदी शंभुकोटिमहेश्वरः॥ कु
9 वेरकोटिलक्ष्मीवान् शक्रकोटिविलासवान्॥७१॥ कंदर्प्पकोटिलावण्यो ॥राम॰॥
दुर्गाकोट्यारिमर्द्दनः॥ समुद्रकोटिगंभीरस्तीर्थकोटिसमाह्वयः॥७२॥ हिम ॥१०॥
वत्कोटिनिःकंपः कोटिब्रह्मांडविग्रहः॥ कोट्यश्वमेधपापघ्नो यज्ञकोटिस

मार्द्धनः॥७३॥सुधाकोटिस्वास्थ्यहेतुः कामधुक्कोटिकामदः॥ब्रह्मविद्याको
टिरूपः सिपिविष्टः सुचिश्रवाः॥७४॥ विश्वंभरस्तीर्थपादः पुण्यश्रवणकी
र्तनः॥आदिदेवो जगज्जैत्रो मुकुंदः कालनेमिहा॥७५॥वैकुंठेनंतमाहात्म्योम
हायोगीश्वरोत्सवः॥नित्यतृप्तो लसद्भावो निःशंको नरकांतकः॥७६॥दीना
नाथैकशरणं विश्वैकव्यसनापहः॥जगत्कृपाक्षमो नित्यं कृपालुः सज्जनाश्र
यः॥७७॥योगेश्वरः सदोदीर्णो वृद्धिक्षयविवर्जितः॥अधोक्षजो विश्वरेताः

॥प॰स॰॥ प्रजापतिशताधिपः ॥७७॥ शक्रब्रह्मार्च्चितपदः शंभुब्रह्मोर्द्ध्वधामगः ॥ सूर्यसो
॥१०॥ मेक्षणो विश्वभोक्ता सर्वस्यपारगः ॥७८॥ जगत्सेतुर्द्धर्मसेतुर्द्धरो विश्वधुरंधरः ॥
॥ निर्ममोखिललोकेशो निःसंगोद्भुतभोगवान् ॥८०॥ विश्वमायो वश्यपवि
10 श्वो विष्वक्सेनः सुरोत्तमः ॥ सर्वश्रेयपतिर्दिव्यानर्घ्यभूषणभूषितः ॥८१॥ स ॥राम॰॥
र्वलक्षणलक्षण्यः सर्वदैत्येंद्रदर्पहा ॥ समस्तदेवसर्वस्वं सर्वदैवतनायकः ॥१०॥
॥८२॥ समस्तदेवकवचं सर्वदेवशिरोमणिः ॥ समस्तदेवतादुर्गंप्रपन्नाशनि

पंजरः ॥८३॥ समस्तभयभिन्नामा भगवान्विष्टरश्रवाः ॥ विभुः सर्वहितोदर्को
हतारिः स्वर्गतिप्रदः ॥८४॥ सर्वदैवतजीवेशो ब्राह्मणादिनियोजकः ॥ ब्रह्मशं
भुपराद्ध्यायुर्ब्रह्मज्येष्ठः शिशुः स्वराट् ॥८५॥ विराड्रूपपराधीनः स्तुत्यः स्तो
त्रार्थसाधकः ॥ परार्थकर्त्ता कृतज्ञः स्वार्थकृत्यसदोज्झितः ॥८६॥ सदानवः स
दाभद्रः सदाशांतः सदाशिवः ॥ सदाप्रियः सदातुष्टः सदापुष्टः सदार्चितः ॥
॥८७॥ सदापूतः पावनाग्र्यो वेदगुह्यो वृषाकपिः ॥ सहस्रनामा त्रियुगश्च

॥प॰स॰ तुर्मूर्त्तिश्चतुर्भुजः ॥८८॥ भूतभव्यभवन्नाथो महापुरुषपूर्वजः ॥ नारायणो मुं
॥११॥ जकेशः सर्वयोगविनिःसृतः ॥८९॥ वेदसारो यज्ञसारः सामसारस्तपोनि
धिः ॥ साध्यः श्रेष्ठः पुराणर्षिर्निष्ठाशांतिः परायणं ॥९०॥ शिवत्रिशूलविध्वं
सी श्रीकंठैकवरप्रदः ॥ नरः कृष्णो हरिर्धर्मनंदनो धर्मजीवनः ॥९१॥ आदि ॥राम॰॥
कर्त्ता सर्वसत्यः सर्वस्त्रीरत्नदर्पहा ॥ त्रिकालजितकंदर्प उर्वशीसृग्मुनी ॥११॥
श्वरः ॥९२॥ आद्यः कविर्हयग्रीवः सर्ववागीश्वरेश्वरः ॥ सर्वदेवमयो ब्रह्म

गुरुर्वागीश्वरीपतिः ॥९३॥ अनंतविद्याप्रभवो मूलाविद्याविनाशकः ॥ सर्व
ज्ञदो जगज्जाड्यनाशको मधुसूदनः ॥९४॥ अनेकमंत्रकोटीशः शब्दब्रह्मैे
कपारगः ॥ आदिविद्वान्वेदकर्त्ता वेदात्माश्रुतिसागरः ॥९५॥ ब्रह्मार्थवे
दाहरणः सर्वविज्ञानजन्मभूः ॥ विद्याराजो ज्ञानमूर्त्तिर्ज्ञानसिंधुरखंड
धीः ॥९६॥ मत्स्यदेवो महाशृंगो जगद्बीजवहित्रदृक् ॥ लीलाव्याप्ताखिलां
भोधिर्ऋग्वेदप्रवर्तकः ॥९७॥ आदिकूर्मोखिलाधारस्तृणीकृतजगद्भरः ॥

॥प.स.॥ अमरीकृतदेवौघः पीयूषोत्पत्तिकारणं ॥९८॥ आत्माधारो धराधारो यज्ञां
॥१२॥ गोधरणीधरः ॥ हिरण्याक्षहरः पृथ्वीपतिः श्राद्धादिकल्पकः ॥९९॥ समस्त
पितृभीतिघ्नः समस्तपितृजीवनं ॥ हव्यकव्यैकभुग्हव्यकव्यैकफलदायकः
॥१००॥ रोमान्तर्लीनजलधिः क्षोभिताशेषसागरः ॥ महावराहो यज्ञघ्नध्वं ॥राम.॥
सनो याज्ञिकाश्रयः ॥१॥ श्रीनृसिंहो दिव्यसिंहः सर्वारिष्टार्त्तिदुःखहा ॥ ॥१२॥
एकवीरोद्भुतबलो यन्त्रमन्त्रैकभंजनः ॥२॥ ब्रह्मादिदुःसहज्योतिर्युगान्ता

12

ग्न्यत्निभीषिणः ॥ कोटिवज्राधिकनखोजगडुःश्रेसमूर्तिर्धृकः ॥ ३ ॥ मातृच
क्रप्रमथनो महामातृगणेश्वरः ॥ अचिंत्यामोघवीर्याढ्यः समस्तासुरघस्म
रः ॥ ४ ॥ हिरण्यकशिपुच्छेदी कालः संकर्षणीपतिः ॥ कृतांतवाहनः सद्यः स
मस्तभयनाशनः ॥ ५ ॥ सर्वविघ्नांतकः सर्वसिद्धिदः सर्वपूरकः ॥ समस्तपा
तकध्वंसी सिद्धमंत्राधिकाकृयः ॥ ६ ॥ भैरवेशो हरार्तिघ्नः कालः कोटिदुरा
सदः ॥ दैत्यगर्भस्राविनामास्फुटब्रह्मांडगर्ज्जितः ॥ ७ ॥ स्मृतमात्राखिल

॥ प॰ स॰ ॥
॥ १३ ॥

त्राताऽङ्कलरूपो महाहरिः ॥ ब्रह्मचर्मशिरःपट्टी दिक्पालो हृद्गभूषणः ॥ ८ ॥
द्वादशार्कशिरोदामा रुद्रशीर्षैकनूपुरः ॥ योगिनीग्रस्तगिरिजात्राता भै
रवतर्जकः ॥ ९ ॥ वीरचक्रेश्वरो त्युग्रो यमारिः कालशंवरः ॥ क्रोधेश्वरो रु
द्रचंडीपरिवारादिदुष्टभुक् ॥ १० ॥ सर्वाक्षोभ्यो मृत्युमृत्युः कालमृत्युनिव
र्तकः ॥ असाध्यसर्वरोगघ्नः सर्वदुग्रहसौम्यकृत् ॥ ११ ॥ गणेशकोटिदर्प्पघ्नो
दुःसहाशेषगोत्रहा ॥ देवदानवदुर्द्दर्शो जगद्भयदभीषणः ॥ १२ ॥ समस्त

॥ राम॰ ॥
॥ १३ ॥

13

दुर्गतित्राताजगद्भक्षकभक्षकः॥ उग्रेशोवरमार्ज्जारः कालमूषकभक्षकः।
॥२३॥ अनंतायुधदोर्द्दंडोनरसिंहोवीरभद्रजित्॥ योगिनीचक्रगुह्येशः शा
क्रारिपशुमांसभुक्॥२४॥ रुद्रोनारायणोमेषरूपशंकरवाहनः॥ मेषरू
पशिवत्राताडुष्टशक्तिसहस्रभुक्॥२५॥ तुलसीवल्लभोवीरोवामाचारो॓
॓खिलेष्टदः॥ महाशिवः शिवारूढोभैरवैककपालधृक्॥२६॥ झिल्लीच
क्रेश्वरः शक्रदिव्यमोंहनरूपदः॥ गोरीसोभाग्यदोमायानिधिर्मायाभ

मायपहः ॥१७॥ ब्रह्मतेजोमयो ब्रह्मश्रीमयश्च त्रयीमयः ॥ सुब्रह्मण्यो वलिध्वंसी वा
मनोदितिदुःखहा ॥१८॥ उपेंद्रो नृपतिर्विष्णुः कश्यपान्वयमंडनः ॥ वलि
स्वराज्यदः सर्व्वदेवविप्रान्नदोऽच्युतः ॥१९॥ उरुक्रमस्तीर्थपादस्त्रिपदस्थ
स्त्रिविक्रमः ॥ व्योमपादः स्वपादांभःपवित्रितजगत्त्रयः ॥२०॥ ब्रह्मेशाद्यै
भिर्वंद्यांघ्रिर्द्रुतधर्मांघ्रिधावनः ॥ अचिंत्याद्भुतविस्तारो विश्ववृक्षो महाव
लः ॥२१॥ राहुमूर्द्धापरांगच्छिद्भृगुपत्नीशिरोहरः ॥ पापात्त्रस्तः सदापुण्यो

14

दैत्याशानिम्नखंडनः ॥२२॥ पूरिताखिलदेवेशो विश्वार्थैकावतारकृत् ॥ स्व
मायानित्यगुप्तात्मा भक्तचिंतामणिः सदा ॥२३॥ वरदः कार्त्तवीर्यादिरा
जराज्यप्रदोनघः ॥ विश्वश्लाघ्यो मितापारो दत्तात्रेयो मुनीश्वरः ॥२४॥ प
रशक्तिसदाश्लिष्टो योगानंदः सदोन्मदः ॥ समस्तेंद्रारितेजोहृत्परमा
मृतपद्मपः ॥२५॥ अनुसूयागर्भरत्नं भोगमोक्षसुखप्रदः ॥ जमदग्नि
कुलादित्यो रेणुकाद्भुतशक्तिकृत् ॥२६॥ मातृहत्यादिनिर्लेपः स्कंदजि

15

द्विप्रराज्यदः ॥ सर्व्वाहृज्ज्ञांतकृद्वीरदर्प्पहा कार्त्तवीर्य्यजित् ॥ २७ ॥ सप्तद्वीपा
वतीदानाशिष्टाचार्ययशप्रदः ॥ भीमः परशुरामश्च शिष्टाचार्यैकवि
श्वभूः ॥ २८ ॥ शिवाखिलज्ञानकोशो भीष्माचार्योग्निदैवतः ॥ द्रोणाचार्य
गुरुर्विश्वजैत्रधन्वा कृतांतकृ[जि]त् ॥ २९ ॥ अद्वितीयतपोमूर्त्तिर्ब्रह्मचर्यैक
दक्षिणः ॥ मनुः श्रेष्ठः सतां सेतुर्महीयान्वृषभो विराट् ॥ ३० ॥ आदिरा
जः क्षितिपिता सर्वरत्नैकदोहकृत् ॥ पृथुर्जन्माद्येकदक्षो गीः श्रीः की

र्त्तिःस्वयंहन्तः ॥३१॥ जगद्धर्त्तिप्रदश्चक्रवर्त्तिश्रेष्ठोदयास्वधृक् ॥ सनकादि
मुनिप्राप्यभगवद्भक्तिवर्द्धनः ॥३२॥ वर्णाश्रमादिधर्माणांकर्त्तावक्ताप्रवर्त्त
कः ॥ सूर्यवंशध्वजोरामोराघवोसद्गुणार्णवः ॥३३॥ काकुत्स्थोवीरराडार्य
राजोधर्मधुरंधरः ॥ नित्यस्वस्थाशयःसर्वभद्रग्राहीशुभैकदृक् ॥३४॥ न
ररत्नंरत्नगर्भोधर्माध्यक्षोमहानिधिः ॥ सर्वश्रेष्ठाश्रयःसर्वशास्त्रार्थग्राम
वीर्यवान् ॥३५॥ जगद्वशीदाशरथिःसर्वरत्नाश्रयोनृपः ॥ समस्तधर्म

स्तः सर्वधर्मदृष्टाखिलार्तिहृत् ॥३६॥ अतीन्द्रो ज्ञांनविज्ञांनपारदृश्वाक्षमांबुधि
ः ॥ सर्वप्रकृष्टः शिष्टेष्टो हर्षशोकाद्यनाकुलः ॥३७॥ पित्राज्ञात्यक्तसाम्राज्य
ः सपत्न्योदयनिर्भयः ॥ गुहादेशार्पितैश्वर्य्यः शिवस्पर्द्धाजटाधरः ॥३८॥
चित्रकूटाप्तरत्नाद्रिर्जगदीशो वनेचरः ॥ यथेष्टामोघसर्वास्त्रो देवेंद्रतन
याक्षिहा ॥३९॥ ब्रह्मेंद्रादिनतैषीको मारीचघ्नो विराधहा ॥ ब्रह्मशापहता
शेषदंडकारण्यपावनः ॥४०॥ चतुर्दशसहस्रोग्ररक्षोघ्नैकशरैककृत ॥

खरारिस्त्रिशिरोहंता दूषणघ्नो जनार्दनः ॥४१॥ जटायुषोग्निगतिदोग
स्त्यसर्वस्वपात्रराट् ॥ लीलाधनुःकोट्यपास्तदुंदुभ्यस्थिमहाचयः ॥४२॥
॥ सप्ततालव्यधाकृष्टध्वस्तपातालदानवः ॥ सुग्रीवराज्यदोहीनमनसै
वाभयप्रदः ॥४३॥ हनुमद्रुद्रमुख्येशः समस्तकपिदेहभृत् ॥ सनागदै
त्यबाणैकव्याकुलीकृतसागरः ॥४४॥ सम्लेच्छकोटिबाणैकशुष्कनि
र्दग्धसागरः ॥ समुद्राद्भुतपूर्वैकबद्धसेतुर्यशोनिधिः ॥४५॥ असाध्यसा

॥प॰म॰॥ धकोलंकासमूलोत्कर्षदक्षणः॥वरदृप्तजगच्छल्यपौलस्त्यकुलकृंतनः
॥१७॥ ॥४६॥रावणिघ्नः प्रहस्तच्छित्कुंभकर्णभिदुग्रहा॥रावणैकशिरश्छेत्ता
निःशंकेंद्रैकराज्यदः॥४७॥स्वर्गास्वर्गत्वविच्छेदी देवेंद्रानिंद्रताहरः॥र
17 क्षोदेवत्वहृद्धर्माधर्मत्वघ्नः पुरुष्टुतः॥४८॥नतिमात्रदशास्यारिर्दत्तरा ॥राम॰॥
ज्यविभीषणः॥सुधावृष्टिमृताशेषस्वसैन्योज्जीवनैककृत॥४९॥देव ॥१७॥
ब्राह्मणनामैकधातासर्वामरार्चितः॥ब्रह्मसूर्येंद्ररुद्रादिवृंदार्पितस

नीत्रियः ॥५०॥ अयोध्याखिलराजाग्र्यः सर्वभूतमनोहरः ॥ स्वाम्यतुल्य
रूपाढ्यो हीनोत्कृष्टैकसत्क्रियः ॥५१॥ स्वपक्षादिन्यायदर्शी हीनार्थाधि
कसाधकः ॥ वधव्याजानुचितकृत्तारकोखिलतुल्यकृत् ॥५२॥ पार्वत्य
धिकमुक्तात्मा प्रियात्यक्तस्मरारिजित् ॥ साक्षात्कुशलवछन्नेंद्राग्नि
तातोपराजितः ॥५३॥ कोशलेंद्रो वीरबाहुः सत्यार्थत्यक्तसोदरः ॥ शर
शंधाननिर्धूतधरणीमंडलोजयः ॥५४॥ ब्रह्मादिकाम्यसान्निध्यसनाथी

॥प॰म॰॥
॥१८॥

कृतदैवतः ॥ ब्रह्मलोकाप्तचांडालाद्यशेषप्राणिसार्थपः ॥५५॥ स्वर्नीत
गर्द्दभाश्वादिस्थिरायोध्यावनैककृत ॥ रामद्वितीयसौमित्रिर्लक्ष्मणः प्र
हतेंद्रजित् ॥५६॥ विष्णुभक्तांसरामाघ्रिपादुकाराज्यनिर्वृतः ॥ भरतोस
ह्यगंधर्वकोटिघ्नोलवणांतकः ॥५७॥ शत्रुघ्नोवैद्यराडायुर्वेदगर्भौष
धीपतिः ॥ नित्यामृतकरोधन्वंतरिर्यज्ञोजगद्धरः ॥५८॥ सूर्यारिघ्नः
सुराजीवोदक्षिणेशोद्विजप्रियः ॥ छिन्नमूर्द्धापदेशार्कशेषाङ्गस्थापि

॥राम॰॥
॥१८॥

18

तामरः ॥५८॥ विश्वार्यो शोवरुणार्थशिरश्छेदाहृताकृतिः ॥ वाजपेयादिना
माग्निर्वेदधर्मपरायणः ॥६०॥ श्वेतद्वीपपतिः सांख्यप्रणेता सर्वसिद्धि
राट् ॥ विश्वप्रकाशितज्ञानयोगो मोहनमिश्रदा ॥६१॥ देवहूत्यात्मजः सि
द्धः कपिलः कर्दमात्मजः ॥ योगस्वामी ध्यानभंगसगरात्मजभस्मकृ
त् ॥६२॥ धर्मो वृषेन्द्रः सुरभीपतिः शुद्धात्मभावितः ॥ शंभुस्त्रिपुरदाहैक
स्थैर्यविश्वरथोद्वहः ॥६३॥ भक्तशंभुजितो दैत्यः मृतवापीसमस्तपः ॥ म

॥ प॰ म॰ ॥ हाप्रलयविश्वैकद्वितीयोखिलनागराट् ॥ ६४ ॥ शेषदेवः सहस्राक्षः
॥ २९ ॥ सहस्रांघ्रिशिरोभुजः ॥ फणामणिकणाकारंयोजिताब्ध्यांबुदक्षिति
ः ॥ ६५ ॥ कालाग्निरुद्रजनको मुशलास्त्रो हलायुधः ॥ नीलांवरो वारुणी
19 शो मनोवाक्कायदोषहा ॥ ६६ ॥ असंतोषो दृष्टिमात्रपातितैकदशानन ॥ राम॰ ॥
॥ बलिसंयमनो घोरोरौहिणेयः प्रलंबहा ॥ ६७ ॥ मुष्टिकघ्नो द्विविदहा का ॥ २९ ॥
लिंदीभेदनो वलः ॥ रेवतीरमणः पूर्वभक्तिखेदाच्युताग्रजः ॥ ६८ ॥ देव

कीवसुदेवाख्यकश्यपादितिसंदनः ॥ वार्ष्णेयः सत्वतांश्रेष्ठः शौरिर्यदुकुलो
द्वहः ॥ ६९ ॥ नराकृतिपरंब्रह्मसव्यसाचिवरप्रदः ॥ ब्रह्मादिकाम्यलालित्य
जगदाश्चर्यशैशवः ॥ ७० ॥ पूतनाघ्नः शकटभिद्यमलार्जुनभंजनः ॥ वाता
सुरारिः केशिघ्नो धेनुकारिर्गवीश्वरः ॥ ७१ ॥ दामोदरो गोपदेवो यशोदानं
दकारकः ॥ कालियमर्द्दनः सर्वगोपगोपीजनप्रियः ॥ ७२ ॥ लीलागोवर्द्ध
नधरो गोविंदो गोकुलोत्सवः ॥ अरिष्टमथनः कामोन्मत्तगोपीविमुक्ति

॥प॰स॰॥
॥२०॥

दः॥७३॥सद्यः कुवलयापीडघाती चाणूरमर्द्दनः॥कंसारिरुग्रसेनादि
राज्यव्यापारितामरः॥७४॥सुधर्मांकितभूर्लोको राजसंधवलांतकः॥
सक्तभग्नजरासंधवलांतको: ॥त्यक्तभग्नजरासंधो भीमसेनयश
प्रदः॥७५॥सांदीपनिमृतापत्यदाता कालांतकादिजित्॥समस्तनार
कित्राता सर्वभूपतिकोटिजित्॥७६॥रुक्मिणीरमणो रुक्मिशासनो नर
कांतकः॥समस्तसुंदरीकांतो मुरारिर्गरुडध्वजः॥७७॥एकाकीजित

20

॥राम॰॥
॥२०॥

रुद्रार्कमरुदाद्यखिलेश्वरः॥देवेंद्रदर्पहाकल्पद्रुमालंकृतमस्तलः॥७
८॥वाणवाहुसहस्रछिन्नंह्याद्रिगणकोटिजित्॥लीलाजितमहादेवो
महादेवैकपूजितः॥७९॥इंद्रार्थार्ज्जुननिर्भङ्गजयदःपांडवैकधृक्
॥काशिराजशिरश्छेत्तारुद्रशक्त्यैकमर्द्दनः॥८०॥विश्वेश्वरप्रसादाढ्य
काशिराजसुतार्द्दनः॥शंभुप्रतिज्ञाविध्वंसीकाशीनिर्द्दग्धनायकः॥
८१॥काशीशगणकोटिघ्नोलोकशिक्षाद्विजार्च्चकः॥सुवतीव्रतपोवश्य

:पुराशिववरप्रदः॥८२॥शंकरैकप्रतिष्ठाधृक्स्वांशशंकरपूजकः॥शि
वकन्याद्भुतपतिः कृष्णारूपशिवारिहा॥८३॥महालक्ष्मीवपुर्गौरी
त्रातावेदलहृत्त्रहा॥स्वधाममुचुकुंदैकनिःकालयवनेष्टकृत्॥८
४॥यमुनापतिरानीतपरिलीनद्विजात्मजः॥श्रीदामरंकभक्तार्थभू
म्यानीतेंद्रवैभवः॥८५॥दुर्वृत्तशिशुपालैकमुक्तिदोद्वारकेश्वरः॥आ
चांडालादिकप्राप्यद्वारकानिधिकोटिकृत्॥८६॥अक्रूरोद्धवमुख्यै

कभक्तस्वच्छंदमुक्तिदः ॥ सबालस्त्रीजलक्रीडामृतवापीकृतार्णवः ॥ ८७
॥ ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैकदः ॥ परिलीनद्विजसुतानेता
र्जुनमदापहः ॥ ८८ ॥ गूढमुद्राकृतिग्रस्तभीष्माद्याखिलकौरवः ॥ पा
र्थोर्थखंडिताशेषदिव्यास्त्रः पार्थमोहमित् ॥ ८९ ॥ गर्भशापछलध्वस्त
यादवोर्वीभरापहः ॥ जराव्याधारिगतिदः स्मृतमात्राखिलेष्टदः ॥ ९० ॥
कामदेवो रतिपतिर्मन्मथः शंबरांतकः ॥ अनंगो जितगौरीशो रतिकां

॥प॰स॰ तः सदेक्षितः ॥९१॥ पुष्पेषुर्विश्वविजयी स्मरः कामेश्वरीप्रियः ॥ उरवा
॥२२॥ पतिर्विश्वकेतुर्विश्वहृद्भोधिपरुषः ॥९२॥ अनिरुद्धोहृहद्धलप्रद्युम्नो
विश्वमोहनः ॥ चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥९३॥ चतुर्वेदैक
22 विश्वात्मा सर्वोत्कृष्टांशकोटिसूः ॥ आश्रमात्मा पुराणर्षिर्व्यासः शाखा ॥राम॰॥
सहस्रकृत् ॥९४॥ महाभारतनिर्माता कवीन्द्रो बादरायणः ॥ कृष्णद्वैपा
यनः सर्वपुरुषार्थैकबोधकः ॥९५॥ वेदांतकर्त्ता ब्रह्मैकव्यंजकः पुरु ॥२२॥

वंशकृत् ॥ बुद्धो ध्यानजिताशेषदेवदेवीजगत्प्रियः ॥९६॥ निरायुधो जगज्जै
त्रः श्रीघनो दुष्टमोहनः ॥ दैत्यवेदबहिःकर्त्ता वेदार्थश्रुतिगोपकः ॥९७॥
शौद्धोदनिर्न्नष्टदिष्टः सुखदः सदसस्पतिः ॥ यथायोग्याखिलकृपः
सर्वशून्योऽखिलेष्टदः ॥९८॥ चतुःकोटिपृथक्तत्त्वं प्रज्ञापारमितेश्वरः ॥
पाखंडवेदमार्गेशः पाखंडश्रुतिगोपकः ॥९९॥ कल्की विष्णुर्यशःपुत्र
कलिकालविलोपकः ॥ समस्तम्लेच्छदुष्टघ्नः सर्वशिष्टद्विजातिकृत् ॥

॥प॰म॰॥
॥२३॥

23

॥२॰॰॥ सत्यप्रवर्त्तको देवद्विजदीर्घक्षुधापहः ॥ अश्ववाराद्रिरेवंतः पृथ्वी
दुर्गतिनाशकः ॥१॥ सद्यः क्ष्मानंतलक्ष्मीकृन्नष्टनिःशेषधर्मकृत ॥ अ
नंतस्वर्णयागैकहेमपूर्णाखिलद्विजः ॥२॥ अस्माध्यैकजगच्छास्ताऽवि
श्ववंद्यो जगद्गुरुः ॥ आत्मतत्वाधिपः कर्तृश्रेष्ठो विधिरुमापतिः ॥३॥
भर्तृश्रेष्ठः प्रजेशाग्र्यो मरीचिर्जनकाग्रणीः ॥ कश्यपो देवराडिंद्रः प्रह्ला
दो दैत्यराट् शशी ॥४॥ नक्षत्रेशो रविस्तेजःश्रेष्ठः शुक्रः कवीश्वरः ॥ मह

॥राम॰॥
॥२३॥

षिराड्गुरुर्विष्णुरादित्येशो बलिः स्वराट् ॥५॥ वायुर्वह्निः शुचिः श्रेष्ठः शंक
रो रुद्रराड्गुरुः ॥ विद्धत्तमश्विन्नरथ्यो गंधर्वाग्र्यो हरोत्तम ॥६॥ वर्णादिरग्र्या
स्त्री गौरी शक्त्याग्र्याश्रीश्च नारदः ॥ देवर्षिराट् पांडवाग्र्योऽर्जुनो वादः प्रवा
दराट् ॥७॥ पवनः पवनेशानो वरुणो यादसांपतिः ॥ गंगातीर्थोत्तमो
ह्यतं स्थलकाग्र्यं वरौषधं ॥८॥ अन्नं सुदर्शनोऽस्त्राग्र्यं वज्रं प्रहरणोत्तमं ॥
उच्चैःश्रवा वाजिराज ऐरावत इभेश्वर ॥९॥ अरुंधत्येकपत्नीशोऽश्वत्थो

॥प॰स॰ शेषःसहस्रराट् ॥ अध्यात्मविद्याविद्यानां प्रणवश्छंदसां वरः ॥२०॥ मेरुर्गिरि
॥२४॥ पतिर्मार्गो मासानां कालसत्तमः ॥ दिनाद्यात्मा पूर्वसिद्धः कपिलः सामवे
दराट् ॥२१॥ तार्क्ष्यः खगेंद्रोऽश्वत्थो वसंतः कल्पपादपः ॥ दातृश्रेष्ठः काम
24 धेनुरार्त्तिघ्नानां सुहृत्तमः ॥२२॥ चिंतामणिर्गुरुश्रेष्ठो माता हिततमः पि ॥राम॰॥
ता ॥ सिंहो मृगेंद्रो नागेंद्रो वासुकिर्नृवरो नृपः ॥२३॥ वर्णेशो ब्राह्मणश्चे
१०००
तः करणानां नमो नमः ॥ इत्येतद्वासुदेवस्य विष्णोर्नामसहस्रकं ॥२४॥ ॥२४॥

सर्वापराधशमनं परं भक्तिविवर्द्धनं ॥ अशेषब्रह्मलोकादिसर्वस्वर्गैकसा
धनं ॥ २५ ॥ विष्णुलोकैकसोपानं सर्वदुःखविनाशनं ॥ समस्तसुखदं सद्य
:परं निर्वाणदायकं ॥ २६ ॥ कामक्रोधादिनिःशेषमनोमलविशोधनं ॥
शांतिदं पावनं नृणां महापातकिनामपि ॥ २७ ॥ सर्वेषां प्राणिनामाशु
सर्वाभीष्टफलप्रदं ॥ सर्वविघ्नःप्रशमनं सर्वारिष्टविनाशनं ॥ २८ ॥ घोर
दुःखप्रशमनं तीव्रदारिद्र्यनाशनं ॥ ऋणत्रयापहं गुह्यं धनधान्ययश

॥प॰स॰॥ स्कारं ॥१९॥ सर्वैश्वर्यप्रदं सर्वसिद्धिदं सर्वधर्मदं ॥ तीर्थयज्ञतपोदानव्रतको
॥२५॥ टिफलप्रदं ॥ जगज्जाड्यप्रशमनं सर्वविद्याप्रवर्त्तकं ॥२०॥ राज्यदं भ्रष्टराज्या
नां रोगिणां सर्वरोगहृत् ॥ वंध्यानां सुतदं चाशु क्षीणानां जीवितप्रदं ॥
25 २१॥ भूतग्रहविषध्वंसी ग्रहपीडाविनाशनं ॥ मांगल्यं पुण्यमायुष्यं श्रवणा
त्पठनाज्जपात् ॥२२॥ सकृदस्याखिला वेदाः सांगा मंत्राश्च कोटिशः ॥ पुरा ॥ए॰म॰॥
णशास्त्रस्मृतयः कृताः सुः पठितास्तथा ॥२३॥ जप्तास्यैकाहरं श्लोकं ॥२५॥

पादंवापठतःप्रिये॥नितंसिद्ध्यन्तिसर्वेषममचिरात्किमुताखिलं॥२४॥नानेन
सदृशंसद्यःप्रत्ययंसर्वकर्मसु॥इदंमद्देवयागोप्यंपाठ्यंस्वार्थैकसिद्धये॥
२५॥नावैष्णवायदातव्यंविकल्पोपहतात्मने॥भक्तिश्रद्धाविहीनायविष्णु
सामान्यदर्शिने॥२६॥देयंपुत्रायशिष्यायसुहृदेहितकाम्यया॥मत्प्रसादा
द्दृतेनेदंयहीष्यंतत्समेधमसः॥२७॥कलौसद्यःफलंकल्पग्रामंनेष्यतिना
रदः॥लोकानांभाग्यहीनानांयेनदुःखंविनश्यति॥२८॥द्विजेषुवैष्णवे

॥पं.म.
॥२६॥

26

ष्यति तदा यावर्त्तं भविष्यति॥नास्ति विष्णोः परं सत्यं नास्ति विष्णोः परं तपः॥२९
॥नास्ति विष्णोः परं ज्ञानं नास्ति विष्णोः परं जपः॥नास्ति विष्णोः परं स्थानं
नास्ति विष्णोः परं पदं॥३०॥नास्ति विष्णोः परं ध्यानं नास्ति मंत्रो ह्यवैष्णवं॥
किं तस्य बहुभिर्मंत्रैः शास्त्रैः किं बहुविस्तरैः॥३१॥वाजपेयसहस्रैर्वा भक्ति
र्यस्य जनार्द्दने॥सर्वतीर्थमयो विष्णुः सर्वशास्त्रमयः प्रभुः॥३२॥सर्वक्रतु
मयो विष्णुः सत्यं सत्यं वदाम्यहं॥आब्रह्मस्तंभपर्यंतं सर्वं समस्तमेतन्मयोदितं॥

॥राम.॥
॥२६॥

३३॥पार्वत्युवाच॥धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्प्रभो॥यन्मये
दंश्रुतंपूर्वंत्वद्रहस्यंसुदुर्लभं॥३४॥अहोबतमहत्कष्टंममस्तसुखदेहसै
॥विद्यमानेपिसर्वेशेमद्भाःक्लिश्यंतिसंसृतौ॥३५॥यमुद्दिश्यमहानाथोमहे
शोपिदिगंबरः॥जटिलोभस्मलिप्तांगस्तपस्वीवीक्ष्यतेजनैः॥३६॥ततोधि
कोस्तिकोदेवोलक्ष्मीकांतान्मधुद्विषः॥यन्नत्वंचिंत्यसेनित्यंत्वयायोगेश्व
रेणहि॥३७॥ततःपरंकिमधिकंपदंश्रीपुरुषोत्तमात्॥नमविज्ञायकंम

॥प॰स॰॥
॥२७॥

27

दाभजतेज्ञानमौनिनः॥३८॥मुषितास्मित्वयानाथचिरंजद्यमीश्वरः॥
प्रकाशितोनमेयस्मात्त्वदाद्यादिव्यशक्तयः॥३९॥अहोसर्वेश्वरोविष्णुः
सर्वैदेवोत्तमोत्तमः॥भवदादिगुरुर्मूर्तैःसामांन्यइववीक्ष्यते॥४०॥महा
यस्तांहिमाहात्म्यंभजमानान्नभजंतिये॥द्विषन्तोवितथापापानुपेक्षंतेतेक्ष ॥राम॰॥
पामयाः॥४१॥मयापिवाल्येस्वपितुःप्रजादृष्टाबुभुक्षिताः॥दुःखादशाक्ता ॥२७॥
संपोष्टुंस्त्रियानाथ्यास्मिताःपुराः॥४२॥मयासंदिहिताभस्त्रप्रजाभ्योभदा

द्यः ॥ विलसंतिसशाङ्का [illegible] ॥ [illegible] स्विं [illegible] मीश्वरः ॥

स्वर्ण्यैकपरिग्रहः ॥ सर्व्वैर्भजि [illegible] वतीयातना स्वैवसंस्थित [illegible] मृ

तेनैव धर्मार्थकाममोक्षोहि दूरतः ॥ क्षुधितानां दुर्गतानां कुतो या [illegible] समा

धयः ॥४५॥ सच संसारमारैक सर्व्वलोकैकनायकः ॥ वशगा कमलायस्य

स्कातामपिशंकरः ॥४६॥ अनोद्धत्येन शौचेन रूपेणार्जवसंपदा ॥ सर्व्वातिशाय

वीर्येणसंपूर्णोस्यमहात्मनः ॥४७॥ कस्तेन तुल्यनामे निदेवदेवेन विष्णुना

||प॰स॰ यस्यांशांशावतारेण विनासर्वं विलीयते ||४८|| जगदेतत्तयाप्याज्ञर्दीषाये
||२८|| तद्विमोहिताः|| नास्ति जन्म जरामृत्युर्नाप्राप्यं स्वार्थमेव च ||४९|| कामाद्या
सक्तचित्तत्वात्किंनु सर्वेश्वर प्रभो|| तत्र यत्नात्समादाय ... कोमिपवित्तुं न
28 चेत् ||२५०|| विष्णोः सहस्रनामैतत्स्मृत्वं हृषभध्वज|| नाम्नैकेन तु येनस्या
त्तत्फलं ब्रूहि मे प्रभो ||२५१|| ... देवउवाच|| राम रामेति रामेति रमे रामे मनोरमे ||रा॰म॰||
... सहस्र ... नाम तत्तुल्यं रामनाम वरानने ... ||२८||